एकादशः पाठः

# द्वीपेषु रम्यः द्वीपोऽण्डमानः






**अध्यापिका** – (*भारतस्य मानचित्रे अण्डमान-द्वीपसमूहं दर्शयन्ती*) एषः भारतस्य अष्टसु केन्द्रशासितप्रदेशेषु अन्यतमः अण्डमान-द्वीपसमूहः अस्ति। एतस्य राजधानी 'श्रीविजयपुरम्' अस्ति। पूर्वम् आङ्ग्लशासनेन अस्य नाम 'पोर्ट-ब्लेयर्' इति दत्तम् आसीत्।

**सर्वे उत्साहिताः बालाः** – महोदये! वयम् एतस्य विषये किञ्चित् अधिकं ज्ञातुम् इच्छामः।

**अध्यापिका** – अस्तु। भोः सूर्यांश! भवान् किमपि वक्तुम् इच्छति? इतिप्रतिभाति।

**सूर्यांशः** – सत्यं महोदये! ह्यः भवती एतस्य पाठस्य विषये सङ्केतं दत्तवती। तदा अहं गृहं गत्वा जालपुटे एतस्य अन्वेषणम् अकरवम्।

**अध्यापिका** – समीचीनं सूर्यांश! भवान् किम् अन्विष्टवान् तत्र?

**सूर्यांशः** – महोदये! रामायणकाले अस्य द्वीपस्य नाम 'हण्डुकमान्' आसीत्। एषः शब्दः प्रायः 'हनूमान्' इति शब्दस्य परिवर्तितं रूपम्। प्रथमशताब्द्याम् अस्य नाम 'अगादेमन्' इति आसीत्। ततः परं 'अङ्गादेमन्' जातम् इति सर्वकारस्य आधिकारिक-जालपुटे अहं दृष्टवान्।

**दीपेशः** – अहो! अस्य नाम्नः इतिहासः अद्भुतः अस्ति। किन्तु खलु भारतस्य इतिहासे अस्य द्वीपस्य काचित् विशिष्टा भूमिका अस्ति?

**अध्यापिका** – आम्, महती भूमिका अस्ति अस्य द्वीपस्य।



**दीपा** – कीदृशी भूमिका महोदये! कृपया सूचयतु।

**अध्यापिका** – अस्मिन् द्वीपे 'सेल्युलर्' इति कारागारम् अस्ति। अस्य कारागारस्य अपरं नाम 'कालापानी' इत्यपि अस्ति।

**सुधीरः** – *(साश्चर्यम्)* आचार्ये! अस्य कः अभिप्रायः?

**सुरेखा** – 'कालापानी' इति शब्दं श्रुत्वा एव भीतिः भवति।



**अध्यापिका** – सत्यमेव। भारतस्य स्वातन्त्र्यार्थं युद्धरतानां क्रान्तिकारिणां दमनार्थं ब्रिटिशजनैः निर्मितं त्रितलात्मकम् एतत् कारागारम्। अत्रैव महान् देशभक्तः स्वातन्त्र्यवीरः सावरकरः मातृभूमेः रक्षणाय दश वर्षाणि यावत् कल्पनातीतं घोरं कष्टं सोढवान्।

**मुकुन्दः** – अहो! धन्याः ते स्वातन्त्र्यवीराः। तेषां बलिदानेन एव वयं सुखेन जीवामः।

**सूर्यांशः** – आचार्ये! एतत् स्थानं 'यूनेस्को'-संस्थायाः वैश्विकसम्पदः सूच्याम् अपि संरक्षितम्।

**ऋचा** – महोदये! किम् अस्मिन् द्वीपे जनाः अपि निवसन्ति?

**अध्यापिका** – आम्, तत्र काश्चन अण्डमानी, ओङ्गी, जारवा, सेण्टिनली इत्यादयः विशिष्टाः जनजातयः निवसन्ति। अण्डमानी-ओङ्गी-जारवा-जनजातीनाम् आजीविकायै सर्वकारः

© NCERT not to be republished



नारिकेलस्य उद्यानानां निर्माणम् अकरोत्। सेण्टिनली-जनजातीयाः समाजात् दूरे तिष्ठन्ति। तेषां जनसंख्या अपि स्वल्पा एव।

**सुरुचिः** – महोदये! अत्र भ्रमणाय विशिष्टानि स्थानानि कानि?

**अध्यापिका** – भवत्सु कोऽपि अस्मिन् विषये कथयितुम् इच्छति?

**राजर्षिः** – आम् महोदये! अहं वक्तुम् इच्छामि। अहम् एकदा पित्रा सह भ्रमणाय तत्र अगच्छम्। वयं तत्र सर्वत्र प्रकृतेः हारित्यं नीलसमुद्रं च दृष्टवन्तः। वयं महात्मगान्धि-मरीन-राष्ट्रियम् उद्यानम्, नॉर्थ-बे-द्वीपम्, समुद्रिका-नौसेना-समुद्रीय-सङ्ग्रहालयं, कालापत्थर-तटम्, विजयनगर-तटं च दृष्टवन्तः। तत्र भारतस्य समुद्रतटेषु राधानगर-तटस्य अत्यन्तं विशिष्टं स्थानम् अस्ति। तत्रत्यः श्वेतरेणुः, नीलं निर्मलं जलं,पारदर्शि समुद्रतलं च अविस्मरणीयम् अस्ति।



© NCERT not to be republished

**अध्यापिका** – उत्तमम्, राजर्षे ! किं भवान् स्वराजद्वीपं दृष्टवान् ?

**राजर्षिः** – न स्मरामि महोदये !

**अध्यापिका** – स्वराजद्वीपे एलीफेण्टा-तटे, नॉर्थ-बे-अन्तरीपे च सिन्धुतलविहारं स्कूबाडाइविङ्ग्, स्नॉर्कलिङ्ग् इत्यादयः विविधाः गतिविधयः चलन्ति। समुद्रस्य अन्तर्भागः विविधवर्णैः मत्स्यैः कच्छपैः अन्यैः जलचरैः प्रवालशृङ्खलाभिः च अलङ्कृतः इव दृश्यते।



**छात्राः** – महोदये! अण्डमान-जनाः आजीविकार्थं किं कुर्वन्ति?

**अध्यापिका** – तत्र मुक्तामालाः, शुक्तिशिल्पानि, नारिकेल-शिल्पानि, उपस्कराः च इत्यादीनाम् उत्पादनेन वाणिज्येन च तेषाम् आजीविका चलति। केचन कृषिकार्येण मत्स्यव्यापारेण च जीविकां निर्वहन्ति।



**छात्राः** – आचार्ये! अस्य वर्णनं श्रुत्वा चित्राणि च दृष्ट्वा अस्माकं मनसि तत्र भ्रमणाय उत्सुकता जागरिता।

**अध्यापिका** – अस्तु, वयम् अवश्यमेव तत्र शैक्षिकभ्रमणार्थं गमिष्यामः।

**अधुना वयं मिलित्वा गायामः –**

**हुतात्मनां पूततपःस्थलीयं**
**विनायकादिस्तुतिभाजनानाम्।**
**स्वराष्ट्रधर्मं ननु शिक्षयन्ती**
**सुदर्शनीया भुवि तीर्थकल्पा॥**

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| द्वीपः | अन्तरीपः | टापू | Island | |
| आकर्षकम् | रमणीयम् | मनोहर | Attractive | |
| जालपुटे | अन्तर्जाले | वेबसाइट पर | On the website | |
| अन्वेषणम् | सन्धानम् | खोज | Search | |
| स्वातन्त्र्यार्थम् | स्वाधीनतार्थम् | स्वतन्त्रता के लिये | For freedom | |
| युद्धरतानाम् | संघर्षरतानाम् | लड़ाई में लगे हुए लोगों के | Of the people engrossed in battle | |
| कल्पनातीतम् | विचारातीतम् | चिन्तन से परे | Beyond imagination | |
| घोरम् | भीषणम् | भयानक | Terrific | |
| वैश्विकसम्पदः | विश्वन्यासस्य | विश्व-धरोहर का | Of world heritage | |
| सोढवान् | सहनं कृतवान् | सहन किया | Bore | |
| सूच्याम् | तालिकायाम् | सूची में | In the List | |
| कारागारम् | बन्धनगृहम् | कारागृह | Prison | |
| त्रितलात्मकम् | त्रिस्तरीयम् | तीन तल का | Three-storied | |
| दशवर्षं यावत् | पर्यन्तम् | तक | Until | |
| जनजातिः | गणजातिः | वनवासी | Tribal | |
| श्वेतरेणुः | धवलधूलिः | श्वेत बालू | White sand | |
| पारदर्शी | तलदर्शी | आर-पार दिखने वाला | Transparent | |
| हारित्यम् | हारितस्य भावः | हरियाली को | Greenery | |
| मुक्तामालाः | मौक्तिकमालाः | मोतियों की मालाओं को | Pearl necklaces | |
| नारिकेलम् | श्रीफलम् | नारियल | Coconut | |
| उपस्कराः | वेसवाराः | मसाले | Seasoning | |
| शिल्पानि | चित्रकलादि-कर्माणि | शिल्पकला | Sculpture | |
| कच्छपः | कूर्मः | कछुआ | Tortoise | |
| प्रवालप्रस्तरैः | विद्रुम-शिलाभिः | मूँगे की चट्टानों से | By the coral reefs | |

© NCERT not to be republished

## वयम् अभ्यासं कुर्मः

**१. पाठं पठित्वा अधोलिखितानि पदानि परस्परं मेलयन्तु—**

| क | ख |
|---|---|
| हान्दुमान् | एलीफेण्टा |
| कालापानी | श्वेतरेणुः |
| जारवा | सावरकरः |
| स्वराजद्वीपः | सेल्यूलरकारागारः |
| राधानगरतटः | जनजातिः |
| स्वातन्त्र्यवीरः | अण्डमानः |

**२. अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु—**

(क) रामायणकाले अण्डमानद्वीपस्य नाम किम् आसीत्?

(ख) स्वातन्त्र्यवीरः सावरकरः कति वर्षाणि कष्टं सोढवान्?

(ग) अण्डमानद्वीपे काः जनजातयः निवसन्ति?

(घ) अण्डमानद्वीपे आजीविकार्थं जनाः किं कुर्वन्ति?

(ङ) अन्ते सर्वे मिलित्वा कं श्लोकं गायन्ति?



**३. पाठं दृष्ट्वा रिक्तस्थानानि पूरयन्तु—**

(क) अण्डमानद्वीपस्य राजधानी .................................... अस्ति।

(ख) सूर्यांशः गृहं गत्वा .................................... अण्डमानस्य अन्वेषणम् अकरोत्।

(ग) प्रथमशताब्द्याम् अस्य नाम .................................... इति आसीत्।

(घ) अस्मिन् द्वीपे .................................... इति कारागारम् अस्ति।

(ङ) वयं स्वातन्त्र्यवीराणां .................................... सुखेन जीवामः।

(च) कालापानी .................................... संस्थायाः वैश्विकसम्पदः सूच्यां संरक्षितम्।

(छ) कृषिकार्येण .................................... च जीविकां निर्वहन्ति।

© NCERT not to be republished

४. **अधोलिखितानां विशेषण-विशेष्यपदानां मेलनं कृत्वा रिक्तस्थानानि पूरयन्तु—**

| | | | | |
|---|---|---|---|---|
| (क) | नीलम् | समुद्रतटेषु | ..........नीलं.......... | ..........समुद्रम्.......... |
| (ख) | सुन्दरतमेषु | आपणे | .............................. | .............................. |
| (ग) | स्वीयाः | समुद्रम् | .............................. | .............................. |
| (घ) | विविधवर्णाः | रीतिपरम्पराः | .............................. | .............................. |
| (ङ) | स्थानीये | स्थानम् | .............................. | .............................. |
| (च) | प्रथमम् | मत्स्याः | .............................. | .............................. |

५. **पट्टिकातः समुचितानि पदानि चित्वा विशेषणानुसारं विशेष्यपदं लिखन्तु—**

वृक्षान्, गुरुकुलम्, गृहे, तटस्य, पाठशालां, पुस्तकानि, शाटिकायां, गजाय, युवती, मार्गः

| | | | | | |
|---|---|---|---|---|---|
| (क) | नूतने | .............................. | (ख) | पवित्रं | .............................. |
| (ग) | रक्तायां | .............................. | (घ) | उत्तमानि | .............................. |
| (ङ) | सुदीर्घः | .............................. | (च) | सुन्दरी | .............................. |
| (छ) | उन्नतान् | .............................. | (ज) | विशालां | .............................. |
| (झ) | स्थूलाय | .............................. | (ञ) | तस्य | .............................. |

© NCERT not to be republished

६. **पट्टिकातः सर्वनामविशेषणपदानि चित्वा वाक्यानि पूरयन्तु—**

ते, तस्मिन्, तत्, तेषां, एषा, तौ, तस्यै, ताः, तेन, सः

(क) .............................. पुष्पाणाम् उद्यानम् अस्ति।

(ख) .............................. वृद्धा आपणं गच्छति।

(ग) .............................. चित्रे चन्द्रयानम् अस्ति।

(घ) .............................. शिक्षकः संस्कृतं पाठयति।

(ङ) .............................. बालकाः जलं पिबन्ति।



(च) ........................ पुष्पम् आकर्षकम् अस्ति।

(छ) ........................ कन्दुकेन क्रीडन्ति।

(ज) ........................ शिक्षिकाः गीतं शिक्षयन्ति।

(झ) ........................ मयूरौ नृत्यतः।

(ञ) ........................ बालिकायै पुस्तकानि यच्छ।



**७. पाठे प्रयुक्तानि अव्ययपदानि क्रियापदानि च चित्वा समुचिते स्थाने लिखन्तु —**

| अव्ययानि | क्रियापदानि |
|---|---|
| यथा – कुत्र | यथा – स्मरामि |
| .......... .......... .......... .......... .......... | .......... .......... .......... .......... .......... |
| .......... .......... .......... .......... .......... | .......... .......... .......... .......... .......... |
| .......... .......... .......... .......... .......... | .......... .......... .......... .......... .......... |
| .......... .......... .......... .......... .......... | .......... .......... .......... .......... .......... |

© NCERT not to be republished

**८. निम्नलिखितानां पदानां स्वरूपं सावधानं दृष्ट्वा उदाहरणानुसारं लिखन्तु —**

यथा – समुद्रस्य मध्ये ........ समुद्रमध्ये ........

(क) द्वीपानां समूहः ........................................

(ख) रामायणस्य काले ........................................

(ग) भारतस्य भूमिः ........................................

(घ) उद्योगस्य विषयः ........................................

(ङ) देशस्य भक्तः ........................................

(च) समुद्रस्य तलम् ........................................



## योग्यताविस्तरः

- श्रीविजयपुरम् – भारतीयसर्वकारेण पोर्ट-ब्लेयर इत्यस्य नाम परिवर्त्य श्रीविजयपुरम् इति कृतम्।
- स्कूबा-डैविङ्ग् – पृष्ठे प्राणवायोः कोषं स्थापयित्वा, कोषे संलग्ननलिकया मुखनासिकाभ्यां श्वासग्रहणेन सह गभीरजले सन्तरणम्।
- स्नॉर्कलिङ्ग्– उपनेत्रं धृत्वा समुद्रजलस्य उपरि प्लवनम्।
- सिन्धु-तल-विहारः– सीवॉक् नाम्ना प्रसिद्धः। अस्मिन् गतिविधौ जनाः समुद्रस्य तलं यावत् गच्छन्ति।
- कोरल्-रीफ् – प्रवालशैलसमूहः कोरल्-रीफ्-नाम्ना ज्ञायते।

| द्वीपानां पुरातनं नाम | नूतनं नाम |
|---|---|
| रॉस्-द्वीपः | नेताजीसुभाषचन्द्रबोसद्वीपः |
| नील-द्वीपः | शहीदद्वीपः |
| हैवलॉक्-द्वीपः | स्वराजद्वीपः |

© NCERT not to be republished



### अण्डमान-प्रशस्तिः

विभात्यवाच्याम्बुधिगर्भशोभी
पुत्रः कनिष्ठः ननु भारतस्य।
सुनीलवारिश्रितस्निग्धगात्रः
द्वीपेषु रम्यः द्वीपोऽण्डमानः॥

राष्ट्रस्य गौरवस्थानमितिहासे महत्स्थलम्।
असकृद्दर्शने योग्यमण्डमानो विराजते॥
चण्डहिंसा स्वदेशार्थं द्रोहिणां खण्डनात्पुरा।
दण्डनैर्यत्र भुक्ताभूदण्डमानो विराजते॥

हरितविपिनरम्यैः संवृतो द्वीपवृन्दैः
लसति परमवाच्यां नीलसिन्धोस्तटस्थः।
प्रथितभुवि निकोबार्-सेल्युलर्-लोकलोके
प्रकृतिकृतिपरोऽयं राजते मेऽण्डमानः॥



## परियोजनाकार्यम्

**१. 'अण्डमान' इति क्षेत्रस्य विभिन्नानां स्थानानां तटानां च चित्राणि सङ्गृह्य शीर्षकसहितं सङ्ग्रह-पुस्तिकायां स्थापयन्तु।**

**२. भवान्/भवती पितृभ्यां / शिक्षकैः सह भ्रमणाय पर्वतप्रदेशे तटीयप्रदेशे च अगच्छत् तस्य एकेन परिच्छेदेन वर्णनं लिखन्तु।**

© NCERT not to be republished